# Bhishmrikritam Shri Krishna Stotram

# भीष्मकृतं श्रीकृष्णस्तोत्रम्

## Document Information

Text title : Bhishmrikritam Shri Krishna Stotram

File name : bhIShmRRikRRitaMshrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | shAntiparva | adhyAya 51/2-4||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# भीष्मकृतं श्रीकृष्णस्तोत्रम्

श्रुत्वा तु वचनं भीष्मो वासुदेवस्य धीमतः ।
किञ्चिदुन्नाम्य वदनं प्राञ्जलिर्वाक्यमब्रवीत् ॥ १॥

नमस्ते भगवन्विष्णो लोकानां निधनोद्भव ।
त्वं हि कर्ता हृषीकेश संहर्ता चापराजितः ॥ २॥

विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन्विश्वसम्भव ।
अपवर्गोऽसि भूतानां पञ्चानां परतः स्थितः ॥ ३॥

नमस्ते त्रिषु लोकेषु नमस्ते परतस्त्रिषु ।
योगेश्वर नमस्तेऽस्तु त्वं हि सर्वपरायणम् ॥ ४॥

मत्संश्रितं यदात्थ त्वं वचः पुरुषसत्तम ।
तेन पश्यामि ते दिव्यान्भावान्हि त्रिषु वर्त्मसु ॥ ५॥

तच्च पश्यामि तत्त्वेन यत्ते रूपं सनातनम् ।
सप्त मार्गा निरुद्धास्ते वायोरमिततेजसः ॥ ६॥

दिवं ते शिरसा व्याप्तं पद्भ्यां देवी वसुन्धरा ।
दिशो भुजौ रविश्चक्षुर्वीर्ये शक्रः प्रतिष्ठितः ॥ ७॥

अतसीपुष्पसङ्काशं पीतवाससमच्युतम् ।
वपुर्ह्यनुमिमीमस्ते मेघस्येव सविद्युतः ॥ ८॥

त्वत्प्रपन्नाय भक्ताय गतिमिष्टां जिगीषवे ।
यच्छ्रेयः पुण्डरीकाक्ष तद्ध्यायस्व सुरोत्तम ॥ ९॥

इति महाभारते शान्तिपर्वणि ५१ अध्यायान्तर्गतं
भीष्मकृतं श्रीकृष्णस्तोत्रं सम्पूर्णम् ।

महाभारत । शान्तिपर्व । अध्याय ५१/२-४॥

mahAbhArata . shAntiparva . adhyAya 51/2-4..

Proofread by PSA Easwaran

*Bhishmrikritam Shri Krishna Stotram*

pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*